# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – आचार्यः (SEM-2)** **प्रश्नपत्रम् – 3** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C.C.4.2.5** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –12/04/2019 सन्दर्भग्रन्थः – श्रीमद्भागवतमहापुराणे एकादशस्कन्धः

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 कस्यचिदेकस्य पद्यस्य ससन्दर्भप्रसङ्गपूर्वकं व्याख्यानं कुरुत।** **05**

(1) क्वचित् रुदन्त्यत्मुतचिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः।
नृत्यन्ति गायन्त्यनुगीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः॥

(2) श्रृण्वन् समुद्राणि रथाङ्गायाणेर्जन्मानि कर्माणि च यानि लोके।
गीतानि नामानि तदर्थकानि गायन् विलम्बो विचरेदसङ्गः॥

**प्रश्नः-2 एकं सविस्तरं लिखन्तु।** **10**

(1) दत्तात्रेयचतुर्विंशतिगुरुणाम् उपदेशः।

(2) योगेश्वराणां भगवत्तत्त्वोपदेशः।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 कस्यचिदेकस्य श्लोकस्य ससन्दर्भप्रसङ्गपूर्वकं व्याख्यानं कुरुत।** **05**

(1) बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः।
गुणस्य मायामूलत्वात् न मे मोक्षे न बन्धनम्॥

(2) केवलेन हि भावेन गोप्यो गावो नगा मृगाः।
येऽन्ये मूढधियो नामाः सिद्धामानीयुरञ्जसा॥

**प्रश्नः-4 एकः सविस्तरं लिखन्तु।** **10**

(1) भक्तिमहत्त्वं ध्यानयोगदर्शनं च कुर्वन्तु।

(2) वर्णाश्रमधर्मनिरूपणं यथाग्रन्थं कुर्वन्तु।

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः-5 कस्यचिदेकस्य पद्यस्य ससन्दर्भप्रसङ्गपूर्वकं व्याख्यानं कुरुत।** **05**

(1) नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम्।
मयानुकूलेन नमस्वेरितं पुमान् भवाब्धिं न तरेत् स आत्महा॥

(2) यतो यतो निवर्तेत विमुच्येत ततस्ततः।
एष धर्मो नृणां क्षेमः शोकमोहभयावहः॥

**प्रश्नः-6 एकं सविस्ततरं लिखन्तु।** **10**

(1) ज्ञानकर्मभक्तियोगानां वर्णनं क्रियताम्।

(2) भिक्षुगीतं यथाग्रन्थं वर्णयन्तु।

**प्रश्नः-7 कस्यचिदेकस्य पद्यस्य ससन्दर्भप्रसङ्गपूर्वकं व्याख्यानं कुरुत।** **05**

(1) किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा।
किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतम् ॥

(2) यथा हिरण्यं स्वकृतं पुरस्तात् पश्चात्त्व सर्वस्य हिरण्यस्य।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥

**प्रश्नः-8 एकं सविस्ततरं लिखन्तु।** **10**

(1) सत्त्वादिगुणत्रयवृत्तिनिरूपणं यथाग्रन्थं क्रियताम्।

(2) भागवतधर्मनिरूपणं ग्रन्थानुसारं विधीयताम्।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) एकादशस्कन्धे का लीला कति चाध्यायाः?

(2) योगेश्वराः कति ? के च ते ?

(3) भागवतोत्तमः कः अस्ति ?

(4) मानवाः कर्माणि कथं कुर्वन्ति?

(5) चत्वारो वर्णाः भगवता कुतः सृष्टाः?

(6) हे महापुरुष ते किं वन्दे ?

(7) श्रीकृष्णः कतिवर्षाणि भूमौ अवसत् ?

(8) बहूनां वासे किं भवति?

(9) विद्यासन्धिः कीदृशो भवति ?

(10) के गुणहेतवः सन्ति ?

(11) कीदृशामुनिम् अनुव्रजामि ?

(12) सार्ववणिको धर्मः कः अस्ति ?

(13) परमेश्वरे दृष्टे सति किं किं भवति ?

(14) तनोः कति अवस्थाः? काश्च ताः?

(15) मखः कतिविधः? कश्च सः?